शाम्भवी

प्रणेत्री

दीक्षितपुष्पा

प्रकाशनम्
जानकीसुन्दरम्, संस्कृत शास्त्र

पौत्र्यै शाम्भव्यै कृतिमिमां समर्प्य
तस्यां भगवत्या जगज्जनन्याः शाम्भव्या आवेशं
भावयामि लोकरक्षणाय

पुरोवाक्

साम्प्रतिकोऽयं समयो वर्तते संस्कृतभाषाया नवोन्मेषस्य नूतन-सम्भावनानां च। अयं नवनवोन्मेषो नवीनाश्च सम्भावना: समसामयिके संस्कृतसाहित्येऽपि प्रतिफलन्तीति शक्यं सुखमुच्छ्वसितुं सर्वैः सुरभारती-सेवकैः। यथा भारतीयप्रज्ञाया दायं बिभ्राणास्ते ते तेजस्विन: पण्डिता: प्रकटयन्ति शास्त्रवैभवं, तथैव नैके कवयन्ति पर:शतं सुकवय: निबध्नन्ति च विविधान् ग्रन्थानगणिता: साहित्यरचनानदीष्णा: सरस्वत्या: सुपुत्रा: अस्यामेव भाषायाम्। वस्तुत ऊनविंशविंशशतकयोर्विपुलं साहित्यं संस्कृते व्यरचयन्नेते सुधिय: सुकवय:। तस्य साहित्यस्य बहुमूल्यानि रचनारत्नानि सम्प्रति लुप्तप्रायाणि। वीरेन्द्रकुमारभट्टाचार्य-हरिदाससिद्धान्तवागीश-हृषीकेशभट्टाचार्य-अप्पाशास्त्रिराशिवडेकरसदृक्षाणां कवितल्लजानां समग्रं साहित्यमिदानीं न लभ्यते।

राष्ट्रियसंस्कृतसंस्थानेन एतादृशानामुत्तमोत्तमरचनाकाराणां लुप्तप्रायस्य सत्साहित्यस्य पुनरुद्धाराय पुन: प्रकाशनाय च पदक्षेपो व्यधायि। अस्मिन्नुपक्रमे भट्टमथुरानाथशास्त्रिणां रतिनाथझावर्याणां मूलशङ्करमाणिकलालयाज्ञिकस्य च समग्रा रचना ग्रन्थावलीरूपेण प्रकाशिता:। केचन सन्ति तादृशा अपि जगन्नाथपाठक-अभिराजराजेन्द्रमिश्र-हर्षदेवमाधव-प्रभृतयो मूर्धाभिषिक्ता: सुकवयो येषां रचना राष्ट्रियसंस्कृतसंस्थानस्य लोकप्रियग्रन्थमालायां प्रकाशिता:।

कवयित्री दीक्षितपुष्पा आधुनिक संस्कृतसाहित्ये भाषाप्रयोगाद्य-नेकदृष्ट्या भजते वैशिष्ट्यम्। अतीतेषु बहुषु वर्षेषु अग्निशिखेति

गीतिसङ्कलनेनेयं सुधीनां समवाये किमपि पदं न्यदधात्। शाम्भवीयं दीक्षितमहाशयाया अभिनवं गीतिसङ्कलनम्। तदिदमपि संस्थानस्य लोकप्रियग्रन्थमालायां प्रकाशनमेतीति हर्षस्य विषयः।

दीक्षितमहोदयानां गीतिषु तीक्ष्णव्यङ्ग्यसंवलिता काव्यार्थसुषमा वक्रोक्तिविच्छित्तिः संस्कृतिमूलार्थसङ्क्रान्तिः सांस्कृतिकोऽनुरागः प्राचीनताप्रीतिः भाषासौष्ठवं काकुर्वैदग्ध्यभङ्गीभणितिश्चेति नैके विशेषा विलसन्ति प्रथयन्ति च तद्वैशिष्ट्यं साम्प्रतिकसाहित्यसंसारे। लोकोऽयम्, नरास्ते के, कालिका करालिका तथा चाऽन्येषु काव्येषु पदशय्यारमणीयता युगविभीषिका च कस्य सचेतसो मनो न हरति। शाम्भवीयं पुष्पादीक्षितमहोदयया वागीश्वरीसमाराधनाय शब्दपुष्पगुम्फिताऽपूर्वैव मणिमालेति नाऽत्र काचित्संशीतिः।

राधावल्लभत्रिपाठी
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्

आन्तरम्

को न पश्यति जङ्गम्यमानेऽस्मिन् जगत्येकस्मिन् क्षणे विलीयमानाया अन्यस्मिन् क्षणे चोद्भूयमानायाः सृष्टेरनियम्यपरीवर्तान्। कोऽस्ति तादृशो यः प्रभवति नियन्तुमेतान्, तथापि नानाविधैरुपायैर्नश्वरामपि लौकिकीं विभूतिं संगृह्यानश्वरीकर्तुं यतमानोऽयं लोकः सर्वथाश्चर्यं खेदं च जञ्जनीति मानसे मे। या जननी, सैव पालनी, संहारिणी च भूत्वा लोकमिमं जातं क्रमेण पालयति, संहरति च। अयमेवास्या लीलाविलासः।

ये सन्ति जङ्गम्यमाना तेष्वेकतमोऽपि विरम्य निमिषमितं यद्यवगच्छति दृश्यादस्मात् पृथग् भूत्वा द्रष्टृत्वं स्वकीयं, तदेयं दृष्टिपथमुपेत्य क्षोभयति प्रतिभां, दर्शयत्यनावृतं स्वरूपं, कारयति च हठात् कवितां, यत्र वैपरीत्येऽपि सुखं मन्यमाना वराका जीवा क्वचिद् हसन्तः, क्वचिद् रुदन्तः, क्वचित् स्निह्यन्तः क्वचिच्च द्विषन्तः स्फुरन्ति। मातृषु वात्सल्यं, प्रियासु माधुर्यं, सखिषु स्वारस्यं, शत्रुषु च वैरस्यमप्यस्या एव विपरिणामाः। किन्त्वनादिवासनाक्लिन्नचित्ता जीवाः पश्यन्तोऽपि न पश्यन्त्यस्या नर्तनं, येन भूमिः सागरायते, सागरश्च भूमीयते। कुटी प्रासादायते, प्रासादश्च कुटीयते। अस्या एव निमेषोन्मेषाभ्यां जायेते प्रलयोदयौ। अस्या एव प्रसादेन सहस्रबाधासंकुलेऽप्यस्मिन् जगति शतं जीवति जीवः। एषैव क्वचित्कारयित्री, क्वचिच्च भावयित्री भूत्वा जनयति, रसयति च कविताम्।

राष्ट्रमिदं प्रतिभाया जनकमजीजनद् तादृशानृषीन् विद्वत्तमान्, ये प्राचीकटन् नानारूपेण प्रतिभासमानेऽस्मिन् जगत्येकतत्त्वमात्मभूतं, स्वस्मिन्नेव हृदि विलसन्तम्। चिदानन्दकलामिमामविज्ञायावज्ञाय च जीवरूपां जीवोऽयमटाट्यते।

एतद्विज्ञानमेवास्ति सूत्रं येन विकीर्णमिदं जगत् पिनद्धुं शक्यते। इदन्तु मानुष एव काये संभवति। किन्त्वनादिवासनाक्लिन्नचेता अयं नानायोनिषु

बम्भ्रमितोऽप्यत्र बम्भ्रमीतीति दर्शं दर्शं चेखिद्यते मे चेतः । एतदेवास्ति कवित्वबीजं मम कवितायाः ।

कृतिमिमां पौ=यै शाम्भव्यै समर्प्य तस्यां भगवत्या जगज्जनन्याः शाम्भव्या आवेशं भावयामि लोकरक्षणाय ।

पाणिनिशास्त्रेऽहर्निशं व्यापृतापि लोकस्य वक्रगतिमिमां विलोक्यान्वभूवं यत् तदेवाभिव्यनज्मि शाम्भवीनामधेययानया ।

तृप्यन्तु भावका अनया, इदमेव सार्थक्यं मेऽनुभूतक्लेशस्येति मन्यमाना –

अनुक्रमः

१.	शाम्भवी	–	१
२.	इति शोचति भारतभूमिरियम्	–	२
३.	लोकोऽयम्	–	८
४.	सभायां कत्थसे धीमन्	–	१०
५.	पिपृच्छिषा	–	१२
६.	गृहं वनायते	–	१४
७.	कथं वर्ते	–	१५
८.	यतन्ते के	–	१७
९.	जनः शून्यप्रभो जातः	–	२०
१०.	किं करोमि	–	२२
११.	नरास्ते के	–	२५
१२.	कीदृशः कालः	–	२७
१३.	ग्रामवधूटी	–	२९
१४.	समीहन्ते	–	३२
१५.	न जाने	–	३४
१६.	प्रीयते नो मनो मे	–	३६
१७.	मनोवेदनम्	–	३९
१८.	अहर्निशम्	–	४२
१९.	चातकेन किं कृतम्	–	४५

२०.	कतिधा न विचिन्त्य मनो व्यथते	-	४६
२१.	विश्वबन्धुता गता	-	४९
२२.	मन्येऽहम्	-	५१
२३.	ब्रूहि कोऽस्मिन् युगे कालिदासायते	-	५३
२४.	विडम्बनम्	-	५६
२५.	गङ्गे	-	५८
२६.	नो तथा दृश्यते जनः	-	६०
२७.	रुदन्तः शास्त्रसम्भाराः	-	६१
२८.	मनोवेदना मे विरामं न याति	-	६३
२९.	के	-	६६
३०.	निर्भया भ्रमाम्यहम्	-	६८
३१.	कालिका करालिका	-	७०
३२.	केन हेतुना	-	७३
३३.	निष्फलं करोति	-	७५

◆◆◆◆◆

शाम्भवी

धरणी विशालमञ्चो नीलं नभो वितानम्।
सूत्रं दधाति शम्भुर्नरिनर्ति शाम्भवीयम्।।

गगनेऽनिलेऽनले वा सलिलेऽथवा स्थले वा।
प्रतिकणमहो जगत्यां वरिवर्ति शाम्भवीयम्।।

अट्टालिका विशाला व्योम्न्युन्नताभ्रमाला।
क्रोडे निधाय सर्वं जरिहर्ति शाम्भवीयम्।।

सृष्टिं स्थितिं लयं वा कालस्य पर्ययं वा।
जगतो विपर्ययं वा चरिकर्ति शाम्भवीयम्।।

मन्वन्तरेष्वतीतेष्वप्सु क्षितिर्निलीना
आगामिसृष्टिबीजं दरिधर्ति शाम्भवीयम्।।

अश्रान्तजागरा वा स्वप्नस्य वागुरा वा।
सकलक्रियासु सततं सरिसर्ति शाम्भवीयम्।।

अक्ष्णोर्निमेषजालं हृदयस्य शान्ततालम्।
सर्वक्रियान्तरालं परिपर्ति शाम्भवीयम्।।

हृदयं जगज्जनन्याः कोऽपि क्षमो न मातुम्।
निखिलन्नु जीवलोकं बरिभर्ति शाम्भवीयम्।।

◆◆◆◆◆

इति शोचति भारतभूमिरियम्

समिदाहरणाय समाकुलिता
असुभिर्गुरुभिर्बहुधा तुलिता:
न मनोरथमत्तगजाकुलिता
अनवाप्तिशुचापि न ये लुलिता:।
मनसस्ततमञ्चसमास्थित-
कामपिशाचनटैर्नहि संकुलिता:
वटव: पटवो मम कुत्र गता
इति शोचति भारतभूमिरियम्।।

पितर: स्पृहयन्ति निवापकृते
कृतघातिसुतेषु तरन्ति न ते
अतिथेरवमाननमेव धिय: फल-
मद्य जनैरुररीक्रियते।
इयती प्रबला जठराग्निशिखा
न शिखी हविषोऽन्नकणं लभते
अमृतेन समा विघसा: क्व गता
इति शोचति भारतभूमिरियम्।।

स्वकुटुम्बिजने निरपत्रपदार-
कुलं प्रतिकूलकटूक्तिपरम्
अवहेलनमेव धवस्य समत्व -
विधिं कलयत्यभिमानधरम्।।

अयि ! किंपचता श्वशुरस्य कुलाय
वदान्यतया पितृगेहभरम्
ललना: क्व गता: पतिधर्मपरा
इति शोचति भारतभूमिरियम्।।

ऋजुता समता न नतिर्न धृति-
र्नहि सा रमणीषु मनोरमता
अवसादपरा गृहकार्यविधौ
बहिरेत्य समाजकृते निरता।।
दुरतिक्रमता निजसौख्यकृते
तनये विनयाय सदा विरता
वनिता: क्व गता गृहधर्मपरा
इति शोचति भारतभूमिरियम्।।

युवकेषु न शास्त्रविचक्षणता
युवतीषु न सा मृदुवत्सलता
निजसंस्कृतिगौरवगानपरा
स्थविरेषु न सा महती स्थिरता।।
जननीजनकौ कलहे निपुणौ
विगुणे चरिते कियती लघुता
शिशव: क्व नु यान्तु दुराधिवृता
इति शोचति भारतभूमिरियम्।।

गुरुतो न भयं पितृतो न भयं
नहि मातृभयं किमु लोकभयम्

सहते न मनोभवचन्द्रपरिप्लुत-
यौवनवारिधितीव्ररयम्।।
अविशुद्धमना रजसा कलुषेण
चिचीषति दुर्धरभोगचयम्
स्मृतयस्तु पदा मृदिताः सकला
इति शोचति भारतभूमिरियम्।।

अतिगृध्नुतया विवहन्ति धनस्य
पणैर्बत पौरुषहीननराः
गृहिणी स्तनपानपरं शिशुम-
प्यपहाय धनार्जनकार्यपरा।।
ननु मुष्टिमितैरपि तुष्टिपराः
स्वगृहेष्वपि षड्रिपुनाशकराः।
गृहिणः क्व गता निजदारपरा
इति शोचति भारतभूमिरियम्।।

यदशान्तमतिः शरदभ्रगति -
र्न विवेकजबोधदृशौ रमते।
नहि पुत्रकलत्रकुटुम्बकुलं
तदपीह मुधा यशसे यतते।।
विगतज्वरता न निमेषमितास्ति
वृथैव कषायपटं दधते।
ननु योगरता यतयः क्व गता
इति शोचति भारतभूमिरियम्।।

अतिघस्मरकालगतिः सकलं
कवलीकुरुते जगतः कुहरम्।
परिनृत्यति तीक्ष्णकृपाणधरा
तृणके गगने समदृष्टिरियम्।।
हृदये पिहिता विषयस्य रति-
र्जरयत्यनिशं वयसो निचयम्।
अरुचिर्विषयेषु मनागपि नो
इति शोचति भारतभूमिरियम्।।

बडिशे विलुठच्छफरीकुल -
मप्यनुमाति शुचा निजचञ्चलताः।
लुठिता अवटे जगतो मनुजा
व्यभिचारविधौ पुनरेव रताः।।
प्रजनौ न विधिर्न मृतौ न सृतौ
न कृतौ बत ते विधयः क्व गताः
शिवतामुपयान्तु कथं सुजना
इति शोचति भारतभूमिरियम्।।

उदरम्भरिशास्तृजनाः क्षुधयार्त -
जनेषु न किं पितरन्त्यधुना[१]
लघयन्ति[२] गुरूनपि तत्त्वदृशः
श्रुतिमार्गचरं दरयन्त्यधुना[३]।।
शठवञ्चकलम्पटमित्रयुता
अतिमन्दधियो गरयन्त्यधुना[४]

क्व नृपाः प्रजया पितृतुल्यमता
        इति शोचति भारतभूमिरियम्।।

नरमांसबुभुक्षुतरक्षुसमा
        अधिसीममिमे विचरन्त्यधमाः
जनपीडनपातकपुञ्जभृतः
        प्रहरन्ति दिवानिशमुन्नियमाः।।
क्व गता हरिपादसरोजसुगन्ध-
        करम्बितपावनधूलिकणाः
क्व गता मम शोकविमोककरा
        इति शोचति भारतभूमिरियम्।।

चितिकल्पनमेव जगन्निखिलं
        न युतिर्नभसो जलदेन यदा
अत एव तनुं निभृतं विजहाति
        निकृत्य कृती रिपवेऽपि मुदा।।
कलमे तुषकञ्चुकवत् स्थितिमन्त
        इमे करुणायतना असुदाः
कलिकालतिमिङ्गिलकोष्ठगता
        इति शोचति भारतभूमिरियम्।।

अपरेद्युरहो अशनं भविता
        न भवेदिति नैव तथापि नतिः
न भवेदनधीतिमहादुरितं
        तपसि प्रतिरोधकरी विहतिः।।

वटवृक्षतलं भवनं स्थिरचित्त -
        सुशिष्यसमाहितिरेव भृतिः
चरितप्रथका गुरवः क्व गता
        इति शोचति भारतभूमिरियम्।।

◆◆◆◆◆

---

१. पिता इव आचरन्ति २. लघु कुर्वन्ति ३. भीषयन्ते ४. गुरून् इव आचरन्ति।

लोकोऽयम्

जने प्रेमप्लुते ताटस्थ्यमाबध्नाति लोकोऽयम्।
तटस्थे प्रीतिमाधातुं सयत्नो भाति लोकोऽयम्।।

अवैरे सज्जने निष्कारणं वैरायते मूढः।
जने दुर्दान्तदौरात्म्ये कुलीनो भाति लोकोऽयम्।।

नभःस्पर्शक्षमे शङ्खोदरश्वेते वसन्सौधे।
तृणावासं मदीयं वीक्ष्य संमृद्नाति लोकोऽयम्।।

अलीकेनोदरं पुष्णन्नलीकं जीवनं जीवन्।
गतालीकं वचो मे किं प्रमाणैर्माति लोकोऽयम्।।

मया मूर्ध्ना नतेनास्मिन् कुटीरे यापितः कालः।
तथाप्याहत्य तालं योद्धुमग्रे याति लोकोऽयम्।।

शकुन्ता जातपक्षा अञ्जसा नीडं जहत्येते।
पितुर्गेहं विभङ्क्तुं शोणिताब्धौ स्नाति लोकोऽयम्।।

जनास्तिष्ठन्तु तूष्णीं वर्धते येषामृणैरेषः।
कृतघ्नः स्वीयमातुर्निष्कृतिं नो याति लोकोऽयम्।।

असह्यं वेदनं सूते स्वदेहे कण्टकस्याग्रम्।
शरीरं मे शराकीर्णं क्रमित्वा याति लोकोऽयम्।।

अभीक्ष्णं चेष्टते दुष्कर्मपङ्कैः कर्मनिर्हारम्।
दृढं बद्ध्वा शिलां कण्ठे तितीर्षुर्भाति लोकोऽयम्।।

अवाच्यं सर्वदा चिख्यासते शास्त्रैर्निरुद्धोऽसौ।
यशः श्रुत्वा परेषां पश्य मौनं याति लोकोऽयम्।।

न सूपे संप्लुता दर्वी रसं सूपस्य जानीते।
वसन् लोके व्यथां लोकस्य नो जानाति लोकोऽयम्।।

अविश्रान्तेन्द्रियग्रामैर्विचिन्वन् नश्वरं भोगम्।
बुभुक्षुभ्यः स्वबन्धुभ्यः कणं नो राति लोकोऽयम्।।

जगद् यत् पूर्वभुक्तं तत् परप्रीत्या पुनर्भुञ्जन्।
अहो धर्मोपदेशे सर्वदा निद्राति लोकोऽयम्।।

व्यतिक्रामत्यहो पूजासु पूज्यानां मृषादर्पात्।
परं स्वार्थाय धूर्तानां गले मालाति लोकोऽयम्।।

दरी कामस्य वक्रा पूर्यते नो रत्नसंघातैः।।
धनार्थं यत् कुलं दारांश्च विक्रीणाति लोकोऽयम्।।

तिरस्कृत्य स्वबन्धूनां गणं वाक्यैः प्रतोदाभैः।
प्रभूणां सारमेयं मोदकैः प्रीणाति लोकोऽयम्।।

◆◆◆◆◆

सभायां कत्थसे धीमन्

इयं संदृश्यते दन्दह्यमानज्ञातिधूमा दिक्।
पताकां मन्यमानस्त्वं सभायां कत्थसे धीमन्।।

गुणाः शून्याय नीतास्ते दिवा सूर्येण नीहारः।
प्रशस्तश्चाटुसूक्तैस्त्वं सभायां कत्थसे धीमन्।।

स्मृतीनां सम्प्रमोषो नो विदग्धेष्वादरं धत्ते।
विलुम्पन् स्वप्रतिज्ञातं सभायां कत्थसे धीमन्।।

सविद्या निन्दया धूता अविद्या अर्चनापूताः।
इति व्यत्यासमात्मीयं सभायां कत्थसे धीमन्।।

शरन्मूको मयूरः श्लाघते नो नीरदापायम्।
अपाये सर्वविद्यानां सभायां कत्थसे धीमन्।।

यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहा विवर्धन्ते।
तथा भोगे कृतस्नेहः सभायां कत्थसे धीमन्।।

कलौ तार्क्ष्यायते काकः कलौ वीरायते क्लीबः।
कलौ शश्वायमानस्त्वं सभायां कत्थसे धीमन्।।

युवानं वारणं श्वा जेतुकामो बुक्कने दक्षः।
गतिं तस्यानुकुर्वाणः सभायां कत्थसे धीमन्।।

स्वपक्षान् कर्तयित्वा व्योमगामी तेऽभिलाषोऽयम्।
कथं पूर्येत निर्विघ्नं सभायां कत्थसे धीमन्।।

कृतघ्नं नैव भुङ्क्ते क्रव्यभक्षः पापभीतोऽसौ।
गतिं स्वीयामजानानः सभायां कत्थसे धीमन्।।

विभिन्दन्तः स्वमातुः कुक्षिमेते कर्कटा जाताः।
प्रसूतो मातृनाशार्थं सभायां कत्थसे धीमन्।।

पतन्त्युल्काः सनिर्घोषं न कोऽप्याप्नोति हृत्तोषम्।
ब्रुवाणः सर्वतः शान्तिं सभायां कत्थसे धीमन्।।

न सध्रीचीनपन्था येन यातो यासि यातासि।
समाजे कात्कृतः सद्भिः सभायां कत्थसे धीमन्।।

कशाघातं न मृष्यत्युत्तमोऽश्वः सत्पथे धावन्।
प्रणुन्नो वाक्प्रतोदैस्त्वं सभायां कत्थसे धीमन्।।

अहन्ता ते दुरन्ता नारिहन्ता शास्त्रमन्ता नो।
इदन्ता तेऽनुगन्तेयं सभायां कत्थसे धीमन्।।

◆◆◆◆◆

पिपृच्छिषा

नो कर्मफलसमवाप्तये
लब्धा जनिर्धरणौ मया।
असकृन्नुनोद भवाय मां
तव हृदयवसतिलुलोभिषा।।

मालायिते तव नाम्नि मम
हृदयं सुभग ! सूत्रायितम्।
निःश्वासततिभी रक्ष्यते
बत ! दर्शनाय जिजीविषा।।

तव निश्चयोऽस्ति शिलोच्चयो
नो झञ्झया विनिवर्तते।
मानो न मे मन्दायते
किमु बाध्यते संजिगमिषा।।

मौनेन हृदयं प्रेष्यते
नो कोऽपि वार्ता नेष्यते।
कालेन सर्वं जेष्यते
किमनर्थकेयं यियतिषा।।

मत्तोऽधिकं ते जगदिदं
त्वत्तोऽधिको नो कोऽपि मे।
नो विनतमूर्धसु युज्यते
तव कुलिशपातलिलङ्घिषा।।

प्रश्नो विरतिमनुपेत्य जनयति
नूतनं प्रश्नान्तरम्।
परिवर्तितानि युगानि ननु
परिवर्तिता न पिपृच्छिषा।।

अविरलकुसुममकरन्दलोभ -
समाकुले मधुकरकुले।
नवमालिकासु च दृश्यते
व्यापादनाय तितर्जिषा।।

दैवेन वा विरहेण वा
हृदयेन वा विनयेन वा।
लोकानुरोधसुखेन वा
विनियम्यते मम जिगदिषा।।

हर्म्यायते स्म कुटीरमपि
साकं त्वया विजने वने।
हर्म्यं कुटीयति तत्क्षणं
नारीत्वशुद्धिशिशङ्किषा।।

तमसं गृहे विनिवेश्य यशसा
धवलिताः ककुभस्त्वया।
मीमांस्यतेऽद्यावधि जनै-
स्तव लोकरञ्जनदिदधिषा[१]।।

१. दध धारणे, अस्मात् सनि 'अ प्रत्ययात्' इति अः।

◆◆◆◆◆

गृहं वनायते

वीतरागता यदा तदा गृहं वनायते।
त्वं प्रतीयसे यदा तदा जगत् तृणायते।।

ये कषायवाससोऽपि मानसे कषायिताः।
ते विशन्ति यत्र तत् तपोवनं रणायते।

भोगनीरसे हृदि प्रलोभ्यसंपदापि किम्।
निःस्वताविभञ्जिवैभवाम्बुधिः कणायते।।

अन्धधावनं कृतं यदीयसञ्चये मया।
अद्य तद्धनं विषं वमन् भृशं फणायते।।

इन्द्रियाणि यद् विशन्ति वासनागुहाशये।
लक्ष्यविच्युतं तदैव जीवनं क्षणायते।।

श्वोवसीय ऐहिकं भृशं भवेदितीच्छया।
तीक्ष्णलोभसायकाहतं मनो व्रणायते।।

नैव कोऽपि पीडितो बहिःस्थितेन हेतुना।
मर्मतोदने सहस्रधा मनो गणायते।।

कामकण्टकास्तुदन्ति मानसं दिवानिशम्।
पुष्पकेसराचितोऽपि शाद्वलः शणायते।।

नैरपैक्ष्यमाकलय्य लोक एष वीक्षितः।
नास्ति कोऽपि यत्कृतेऽद्य जीवनं पणायते।। ◆◆◆◆

कथं वर्ते

स्वकीयैः शोणितैः प्रेम्णा मया या भूरि संसिक्ता।
अये सा वाटिका घूकैः समाक्रान्ता कथं वर्ते।।

असौ नानद्यमानोऽस्मिन् वने सिंहायते फेरुः।
तदर्चायामिमे सिंहाः समुद्भ्रान्ताः कथं वर्ते।।

शवे मांसं यदासीत् तत्तु गृध्रैर्भक्षितं पूर्वम्।
इमे श्वानोऽस्थिपुञ्जं भोक्तुमश्रान्ताः कथं वर्ते।।

मया गेहस्य रक्षायै नियुक्तो यः शठो भृत्यः।
स राजानत्यहं गेहाद् विनिष्क्रान्ता कथं वर्ते।।

गृहे येषां स्वचापल्यं विहायैषा स्थिरा लक्ष्मीः।
जिघत्सा दानवी तेषामविश्रान्ता कथं वर्ते।।

मदीया कामधेनुर्दुग्धराशीन् स्नौति यान् नित्यम्।
अये ! ते पानपूर्वं हन्त तक्रान्ताः कथं वर्ते।।

मया ते नामधेयं श्वाससन्तानेषु संयुक्तम्।
सखे मैत्री त्वदीया पश्य वक्रान्ता कथं वर्ते।।

स्थिता ये धर्ममार्गे केवलं सासद्यमानास्ते।
विपन्नानां दशा तेषामुदग्रान्ता कथं वर्ते।।

जलं मेघायते मेघा जलत्वं प्राप्नुवन्त्येते।
न विश्रामो गतिर्लोकस्य चक्रान्ता कथं वर्ते।।

विशुद्धं सत्त्वमप्यस्मिन् कलौ संदूष्यते नीचैः।
निगूढा विक्रिया कालस्य वक्रान्ता कथं वर्ते।।

◆◆◆◆

यतन्ते के

महापुण्येन जातं जन्म येषां भारते वर्षे।
इमं दर्पं स्ववाचा तेषु विख्यातुं यतन्ते के ।।

शिरो धुन्वन्तु सर्वे सूत्रकाराः शास्त्रकारास्ते ।
इदानीं शास्त्रपङ्क्त्यर्थं समाधातुं यतन्ते के ।।

यशस्तेषां दिगन्तव्यापि चारित्रेण ये हीनाः ।
अतः स्वे जीवने रामत्वमाधातुं यतन्ते के ।।

शिबिर्नोत्पद्यते नो रन्तिदेवो नो दधीचिर्वा ।
स्वभोज्याद् ग्रासमेकं स्वच्छेया दातुं यतन्ते के ।।

इदानीं भूतले सम्यक् स्थितं कामस्य साम्राज्यम्।
जगत् किं कोऽस्त्ययं जीवोऽनुसन्धातुं यतन्ते के ।।

प्रतिष्ठासूचकं जातं समाजे यत् सुरापानं ।
तदा कृच्छ्रैर्व्रतैस्तीर्थोदकं पातुं यतन्ते के ।।

धनाढ्याः पञ्चतारास्थाननिर्माणे धृतोत्साहाः ।
गृहावासन्तु पान्थेभ्यो विनिर्मातुं यतन्ते के ।।

जना धर्मे रताः पाखण्डकूपे दर्दुरायन्ते ।
समूलं सस्वरं वेदार्थमाख्यातुं यतन्ते के ।।

नितम्बोद्वर्तनं कृत्वाऽद्य धिङ् नृत्यत्यरे पौंस्नम् ।
अमुष्यै मातृभूम्यै जीवनं दातुं यतन्ते के ।।

कवित्वं दूषितं भण्डैः कविम्मन्यैर्नटैश्चान्यैः ।
स्वकाव्यैः श्रीहरेः शुभ्रं यशो गातुं यतन्ते के ।।

जना धावन्त्यमी वीथीष्वहोरात्रं मदोन्मत्ताः ।
शवं मार्गे निरीक्ष्यापि क्षणं स्थातुं यतन्ते के ।।

उपायैः कोटिभिर्देशेऽपराधा एव शिक्ष्यन्ते ।
अतः स्वे पापलिप्ते कर्मणि ग्लातुं यतन्ते के ।।

ऋषिज्ञानं व्युदस्य व्यायता शिक्षापिशाचीयम्।
अधर्मः कश्च को धर्मः परिज्ञातुं यतन्ते के ।।

युगेऽस्मिन् भीषणे बुद्धौ कुतर्का एव जायन्ते।
इदानीं पूर्वजानां सत्पथैर्यातुं यतन्ते के ।।

विना स्नानं सुगन्धिद्रव्यलेपैर्जायते सज्जा।
महाकुम्भोत्सवे गङ्गाजले स्नातुं यतन्ते के।।

अहो एतेऽभिनेतारो जनानां जीवनादर्शाः।
अरे स्वीयं चरित्रं तापसैर्मातुं यतन्ते के।।

दिलीपेनैकधेनोः प्राणरक्षार्थं वपुर्दत्तम्।
इमां क्षुत्तृड्रुजाक्रान्तां प्रजां त्रातुं यतन्ते के।।

जना मार्गैरसंख्यैः कामयन्ते कामनासिद्धिम्।
अजस्रं श्रीहरेर्नामाक्षरं म्नातुं यतन्ते के।।

निलीना भारतीया संस्कृतिर्यद् पश्चिमध्वान्ते।
तदुद्धाराय खे मार्तण्डवद् भातुं यतन्ते के।।

भवेद् राष्ट्रस्य भाषा संस्कृतं वेदः सदाचारः ।
अखण्डं भारतं भूयादिति ध्यातुं यतन्ते के ।।

ततं नाडीषु येषां राष्ट्रभक्तानामसृक् शुद्धम्।
यतन्ते ते यतन्ते ते यतन्ते ते यतन्ते ते।।

◆◆◆◆◆

जनः शून्यप्रभो जातः

न कान्तिस्तादृशी वक्त्रे न शान्तिस्तादृशी स्वान्ते।
अशिष्टेनाध्वना गच्छन् जनः शून्यप्रभो जातः।।

विना मात्रा विना पित्रा विना भ्रात्रा विना मित्रैः।
स्वकीयं वैभवं भुञ्जन् जनः शून्यप्रभो जातः।।

न भक्तिर्नैव वैराग्यं न च श्रद्धा न वा युक्तिः।
चरित्रं स्वं समुद्घोषन् जनः शून्यप्रभो जातः।।

समाजस्याग्रणीर्भूत्वा जनानां सेवया क्लान्तः।
गृहे वृद्धान् न संरक्षन् जनः शून्यप्रभो जातः।।

वसन्ते कोकिलास्तूष्णीमिमे काका रुवन्त्युच्चैः।
कठोरं वाशितं शृण्वन् जनः शून्यप्रभो जातः।।

अवृत्त्या क्लिश्यमानो नो मृगेन्द्रोऽयं तृणं भुङ्क्ते।
तदीयामायतिं चिन्तन् जनः शून्यप्रभो जातः।।

भ्रुकुंसा ग्रामबाह्या अद्य देवत्वं प्रपद्यन्ते।
तदीयानुक्रियाक्लान्तो जनः शून्यप्रभो जातः।।

धनं नो नैव बुद्धिर्नैव विद्या नो बलं किञ्चित्।
तथाप्युच्चैः पदं प्रेप्सन् जनः शून्यप्रभो जातः।।

मनोराज्यं जितं नो नैव नष्टं वासनाबीजम्।
यतित्वं दूषितं पश्यन् जनः शून्यप्रभो जातः।।

मया खातं सरः क्लेशादिमे नक्रा विगाहन्ते।
श्रमं स्वीयं वृथा जानन् जनः शून्यप्रभो जातः।।

यथाकालं मयोप्तं बीजमन्यो लोलवीत्येषः।
क्षुधार्ता बन्धुतां पश्यन् जनः शून्यप्रभो जातः।।

प्रवृत्तं नाटकं कीदृङ् नटाः सर्वे खरा यत्र।
अवार्ये प्रेक्षणे नृत्यन् जनः शून्यप्रभो जातः।।

अशेषं जीवनं नीतं बुधैर्यैः शास्त्ररक्षार्थम्।
न तेषामादरं पश्यन् जनः शून्यप्रभो जातः।।

न तप्तं गाङ्गतीरे नो मुकुन्दस्य श्रिता पादाः।
जरायां जीर्णकायः सन् जनः शून्यप्रभो जातः।।

◆◆◆◆◆

किं करोमि

किं करोमि मदीयगेहे
कोऽपि मां नहि परिचिनोति।
क्षीरजलधौ कौस्तुभं
मीनो न किं बहुधा धुनोति।।

राहुणा ग्रस्तः शशाङ्को
यन्न निकृतिं प्रतिकरोति।
ज्योतिरिङ्गणरिङ्गणं
नैशान्धकारमपाकरोति।।

योऽतिपीरवतां गतोऽयम्
मदुपसृष्टैरन्नपूगैः।
सोऽपि मामवहेलया
कृतघाति बलिभुग् धिक्करोति।।

पालितो बहु लालितो
विनियोजितो गृहरक्षणे यः।
बहुतिथे काले गते
स द्वारशुनकस्त्वङ्करोति।।

अद्य तार्क्ष्यस्तक्षकं
स्तोतुं स्वयं पुरतः करोति।
शुष्कपङ्कजपल्वलं
क्षुभितं पयोधिं न्यक्करोति।।

कोटरस्थो वह्निरपि
दन्दह्यते सघनं वनालिम्।
विद्यते न हि किमपि सलिलं
यच्छमलममलीकरोति।।

दन्दशूको दोग्धि बत
नरवक्षसः क्षतजासवानि।
कोऽपि नो शमयन् धिया
दोषं प्रसह्य निराकरोति।।

भूतले परिमृदितलतिकां
यः स्वयं समुपस्करोति।
स द्रुमोऽपि तदीयहृदयं
निर्दयं शूलाकरोति।।

गर्दभं गान्धारवाजी
प्रश्रयेण नमस्करोति।
मृगयुभीतेयं मृगी
सिंहं शरणमङ्गीकरोति।।

हन्त ! नैशीथे तमसि
चन्द्रो न कोऽपि पदं करोति।
कोऽपि किं नो भूतले
यो नवलपथमुररीकरोति।।

योऽयमेकाकी चरन्
विश्वं कुटुम्बं स्वीकरोति।
तमपि नि:सङ्गं जनं
लोको मदेन तिरस्करोति।।

◆◆◆◆◆

नरास्ते के

जगत्यस्मिन् विशाले नृत्यतीयं शाम्भवी शक्ति:।
तदीयं ताण्डवं दृष्ट्वा न कम्पन्ते नरास्ते के।।

यदा सीमासु रक्तै रञ्जिता वीरा विहन्यन्ते।
तदा ये गीतवादित्रेषु रज्यन्ते नरास्ते के।।

समायान्ति स्वकं गेहं यदा विप्रास्तपोनिष्ठा:।
समुत्थाय प्रहर्षैर्नाभिवन्दन्ते नरास्ते के।।

यदीयेनान्धसा संवर्धितो देह: क्षुधाक्रान्त:।
कुलं तेषां समुच्छेतुं न लज्जन्ते नरास्ते के।।

महासंहारलीलावातचक्रैर्ये हता मार्गे।
शवास्तेषां धनार्थं यैर्विलुच्यन्ते नरास्ते के।।

न पङ्क्तीनां समाधानं न शास्त्रार्थे गुण: कश्चिद्।
तथाप्यास्फोट्य कण्ठं ये विकत्थन्ते नरास्ते के।।

कुलस्त्री चत्वरे यान्ती बलादाकृष्यते नीचै:।
खलानेतान् सभामध्येऽनुमोदन्ते नरास्ते के।।

न शब्दार्थौ न रीतिर्नो रसो नैव ध्वनि: कश्चित्।
परं मञ्चे समासीना: कवीयन्ते नरास्ते के।।

घुणो भुङ्क्ते स्ववंशं रीतिरेवैतादृशी लोके।
अरे यै: पूर्वजा: स्वर्गान्निवर्त्यन्ते नरास्ते के।।

अकारं नो इकारं नो उकारं नैव जानन्ति।
तथाप्युच्चैः पुरस्कारैः प्रशस्यन्ते नरास्ते के।।

यतो राष्ट्रस्य रक्षार्थं धृतोऽयं मानुषो देहः।
बलीयस्यागते शत्रौ न शङ्कन्ते नरास्ते के।।

इतो धर्मस्य मर्यादा ततो रत्नस्य संभारः।
परीक्ष्यान्तःक्रियां धर्मं न लङ्घन्ते नरास्ते के।।

तपस्तप्तं कृतं दानं चितं पुण्यं श्रुतो वेदः।
नभस्यादित्यवल्लोके प्रकाशन्ते नरास्ते के।।

सुताः क्षामानना जीर्णैः पटैराच्छादिता वामा।
विपत्तावाप्तकामा ये न याचन्ते नरास्ते के।।

क्वचिन्मित्रायते शत्रुः क्वचिच्छत्रूयते मित्रम्।
विभोर्लीलेयमस्यां ये न खिद्यन्ते नरास्ते के।।

क्वचित् केनापि पुण्येनाप्यतेऽयं मानुषो देहः।
इतः संप्लुत्य मोक्षार्थं विचेष्टन्ते नरास्ते के।।

सखे शब्दा इमे मे मानसं भित्त्वा विनिर्याताः।
मदीयैर्विप्रलापैर्ये न दूयन्ते नरास्ते के।।

◆◆◆◆◆

कीदृशः कालः

यशांस्युच्चैरुलूकानां यतो गर्वेण गीयन्ते।
अरे ! तेनैव रज्जौ पन्नगाः सत्यं प्रतीयन्ते।।

धरे सह्यः कथं भारो जनानां तद्विधानां ते।
सुतं तातं च ये स्वार्थेन हत्वा नो हृणीयन्ते।।

खरीवात्सल्यवत् पित्रोर्वृथा स्नेहातिरेकोऽयम्।
कुमार्गे प्रस्थिता याभ्यां न सन्ताना विनीयन्ते।।

प्रविष्टो दन्दशूकश्चेद् गृहे क्रुद्धः फणां कुर्वन्।
मनुष्यैस्तत्र हर्षोदर्कयत्नाः किं विधीयन्ते।।

यथेमे कुक्कुरा लज्जाविहीना वान्तमश्नन्ति।
तथा ये चर्वितं चर्वन्ति ते कस्मान्न हीयन्ते।।

प्रसन्ना मानसे धौता बकाः पक्षान् विधुन्वन्ति।
इदानीं राजहंसैः पल्वले पङ्कानि पीयन्ते।।

द्विजैः शीर्ष्णा नतैर्यैरात्मनः साक्षात्क्रिया लब्धा।
परब्रह्मस्थितानामप्यहो चेतांसि मीयन्ते।।

तृणे वैश्वानराभा येषु कामा एव वर्धन्ते।
तृषापङ्के निमग्नास्ते वृथा लोके महीयन्ते।।

द्रुमैराव्योम विस्तीर्णैर्घनैः शाखाभुजैरेभिः।
लुठन्तीभ्यो लताभ्यः संश्रयाः किन्न प्रदीयन्ते।।

सदा प्राच्येव सूते भास्करं दीप्तं प्रभातार्थम्।
प्रतीच्यां वर्धितास्ते स्नेहबन्धा नावसीयन्ते।।

क्वचिन्न स्थीयते वाताहताभिर्नौभिरेताभिः।
तथाप्येतेऽध्वनीना जीवनाशाभिर्विजीयन्ते।।

न जाने कीदृशः कालः समायातोऽधुना बन्धो।
मुदा विद्रायतेऽल्पज्ञः शुचा प्राज्ञा निलीयन्ते।।

◆◆◆◆◆

ग्रामवधूटी

यत्क्षणेऽहं दुकूलैर्वृता ज्ञातिभि -
स्तत्क्षणं लौकिकज्ञानमाच्छादितम्।
अन्यपादानुगामिन्यहं कारिता
यन्त्रितं दामभिश्चित्तमेकं सखे।।

नैव दृष्टिर्मदीया न सृष्टिर्मम
नैव बुद्धिर्मदीया गतिर्नो मम।
कामिनीभिर्हसन्तीभिरालाम्बिता
नैव जाने क्व संस्थापिताऽहं सखे।।

एकदीपः श्लथस्तीव्रवाताहतः
सोऽपि वक्रानुगत्या तमःसङ्गतः।
पादगत्यावबुद्धं त्वदीयागतं
द्योतिता मङ्क्षु सौदामनीयं सखे।।

त्वत्करस्पर्शनैः सृष्टिरावर्जिता
न्यासिता नव्यलोके नकारान्विता।
आशु शुक्ले यथा वर्धते चन्द्रमा
एधितं मन्मनोराज्यमेतत् सखे।।

पार्थिवं गन्धमाश्रित्य वायुः सदा
गन्धवाहाभिधामश्नुते सत्वरम्।

कामना यत्त्वदीया मनस्याहिता
  कामिनीभाव आसादितोऽयं सखे।।

सोऽवगुण्ठो मुखे भ्राजमाने रवौ
  रात्रिसान्द्रान्धकारेऽपि लज्जावरः।
बीजमेतत्क्षणे येन वृक्षायितं
  कीदृशोऽसौ जनो द्रष्टुमुत्का सखे।।

अध्वजातं परिक्लेशजातं सदा
  गेहमासाद्य पान्थस्य शंशम्यते।
नीयते श्रान्तिरेषा न जाने कथं
  प्राप्य बाहूपधानं त्वदीयं सखे।।

आतुरो वित्तनाशेन लोको यथा
  त्वत्प्रवासव्यथा मे ललाटाङ्किता।
नासि लज्जाव्यवायेन रुद्धो मया
  न श्रुतं मौनसम्भाषणं मे सखे।।

उल्बणैः सायकैर्मर्मसु क्षोभिता
  साहमेषा मृशन्ती मनःपीडनम्।
वायुना नीयमानेव कादम्बिनी
  प्रेममर्यादया भिन्नधैर्या सखे।।

पक्षतिच्छाययाण्डो द्विजैः पोष्यते
  पक्ष्मभिः किन्न चक्षुर्द्वयं रक्ष्यते।
मानसे मेऽनुबद्धा त्वदीयाकृति -
  र्वीक्ष्यते शून्यमार्गो मयायं सखे।।

तद्गृहं नास्ति यस्मिन् न ते संस्थिति-
  र्व्यापृता गेहकार्ये न ते विस्मृतिः।
पञ्जरेऽसौ शकुन्तः समुद्विजते
  धिग् धिगस्ति त्वदीयं प्रवासं सखे।

यद् गवाक्षादुपेत्य स्मितैर्मञ्जुभिः
  संस्पृशत्येष सूर्यः कपोलद्वयम्।
सन्दिहाना त्वदीयं करस्पर्शनं
  नित्यमेव प्रबोधं लभेऽहं सखे।।

चन्दनैश्चर्चितं ते वपुर्दृश्यते
  व्योममध्यस्थिते शीतरश्मेस्तनौ।
हन्त हस्तौ प्रसार्योपतिष्ठे यदा
  मेघमालाभिराच्छाद्यते तत् सखे।।

वाचनं नैव जाने न वा लेखनं
  सम्भवेद् भावनानां कथं प्रेषणम्।
आगतं श्रावणे भावि ते निश्चितं
  ज्ञापिका मन्मनोवेदनेयं सखे।।

◆◆◆◆◆

समीहन्ते

जना अश्मप्लवैरात्मानमुद्धर्तुं समीहन्ते।
शिचस्तन्त्यां निबद्धाः पक्षिणः सर्तुं समीहन्ते।।

इमे लोका जनैः पर्यायतोऽभुज्यन्त भुज्यन्ते।
कुलाङ्गारास्तदर्थं किं वृथा मर्तुं समीहन्ते।।

नृपः सर्वसहो नो दृश्यते रामे गते लोके।
खलाः सर्वकषाः सर्वसहां धर्तुं समीहन्ते।।

अयं पाणिन्धमः पन्था न पुत्रा मां विजानीयुः।
धमन्यां नो मदीयं शोणितं स्मर्तुं समीहन्ते।।

कदर्थीकृत्य मृत्युं कुक्षिपूर्तौ व्यापृता लोकाः।
इदं दुष्पूरपातालं तृणैर्भर्तुं समीहन्ते।।

श्रुतं नो नामधेयं पाणिनेर्यैर्जल्पनादक्षैः।
कदर्याः शब्दशास्त्रेऽव्याहतं सर्तुं समीहन्ते।।

अलं नो विश्वसम्पत् व्यष्टिसन्तोषाय निःशेषा।
परं हस्तद्वयेनैनां समाहर्तुं समीहन्ते।।

मदीयेनान्धसा पुष्टा मदीयप्राङ्गणे जुष्टा।
बलिं ध्वाङ्क्षा मुषित्वा मामपाकर्तुं समीहन्ते।।

न जाने कीदृशो वैज्ञानिको जातः समुन्मानः।
शठोदर्का विधेरीहां वृथाकर्तुं समीहन्ते।।

अहो वैदेशिकीभाषां तथा वैदेशिकीं भूषाम्।
अमुक्ता दास्यसंस्कारान्न विस्मर्तुं समीहन्ते।।

तरीतुं नैव जानन्ति स्वयं मोहाम्बुधौ मग्नाः।
करे धृत्वा परन्त्वन्यान् समुद्धर्तुं समीहन्ते।।

न तर्को नैव बुद्धिर्नो विवेको नो सदाचारः।
अथो शास्त्रस्य मर्यादां तिरस्कर्तुं समीहन्ते।।

दुराचारैर्नृशंसैर्दस्युभी राष्ट्रे समाक्रान्ते।
जनास्तस्मिन् वसन्तः किं वसन्तर्तुं समीहन्ते।।

◆◆◆◆◆

न जाने

जाने न किं मदागतं
दु:खायते सदा सुखम्।
स्नेहोऽपि दूष्यते छलै:
कारायते निजं गृहम्।।

ज्ञातं मया न कैतवं
वीतं वयश्च निर्मिषम्।
तुभ्यं समर्पितं सुखं
तुभ्यं मनोऽप्यनावृतम्।।

छाया द्रुमालया सदा
तापायते मदाश्रिता।
ज्वाला दिशि प्रसारिता
दावायते घनं वनम्।।

बिन्दुस्त्वया समर्थितो
धारामुपेक्ष्य सर्वदा।
धातुर्नवीनताश्रय:
संदृश्यसे सखे कथम् ?

पूर्णं विलोक्य यत् सर-
स्तूर्णं मयाऽवगाह्यते।
शून्यं भवत्यहो द्रुतं
शुष्कायते च जीवनम्।।

नोपालभे च ते मनो
नोपालभे च दैवकम्।
स्पर्शेन मे सदैव यल्
लौहायते च काञ्चनम्।।

पानीयमाप्यते ध्रुवम्
मत्वा मयाऽनुधावितम्।
अम्भो मरौ समीहितं
दूरायते च तत्क्षणम्।।

नो रोचते त्वया विना
यन्मे जगज्जनाकुलम्।
स्नेहातिरेकतो च ते
पाशायते भुजद्वयम्।।

◆◆◆◆◆

प्रीयते नो मनो मे

बाल्ये मौग्ध्याद् सकलजगति प्रेमपाशानुबद्धा
न स्वीयो नो पर इव जनः कोऽपि दृष्टौ प्रतीतः।
तन्मे स्नेहाकुलितहृदयं दूरतः क्व प्रयातं
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

स्नेहः स्थायी क्षणिककलहो यत्र मुग्धो विहासः
चिन्तामुक्तिः सकलविषयेष्वद्भुता नव्यदृष्टिः।
लौल्यं क्रीडास्वविरतगति क्वाद्य काले प्रलीनं
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

इन्द्रः स्वर्गे यदनुभवति प्राक्तनैः पुण्यपुञ्जैः
सौख्यं तस्मादपि बहुतरं मातुरङ्केऽन्वभूवम्।
क्वादः सौख्यं क्व नु खलु गता सौख्यदाम्बा मदीया
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

यस्य ख्यातिर्जगति नरिनर्ति स्म वन्या मृगीव
तस्य क्रोडे महति जननं प्राप्य गर्वाञ्चिताऽहम्।
वाणी तस्य श्रुतिरसभृता सम्प्रति श्रूयते नो
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

रागे गाढे विगलिततमस्यात्मभूतं समस्तं
कीदृङ् मै=यं निखिलभुवनव्यापि मोहान्धकारि।
क्वेदं मै=यं क्व नु खलु गताः दृष्टिवश्या वयस्याः
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

यानाराद्धुं न गणितमिदं जीवनं वा धनं वा
येषां प्रीतिर्मनसि कलिता ज्यायसी मोक्षतोऽपि।
औदासीन्यं वयसि चलिते ते प्रयाता इदानीम्
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

वात्याचक्रे निपतति यथा शुष्कपत्रं तथा मे
संसाराग्नौ न्यपतदचिरं मानसं भोगसक्तम्।
स्वातन्=यं मे निगडितमहो कीदृशी वैवशीयम्
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

आकौमाराद् विबुधगुरुणाध्यापिता स्नेहपूर्वं
शास्त्रं तन्मे सपदि गलितं क्षीणपात्राद् यथाम्भः।
दुर्वैदग्ध्यादपगतमतिर्धर्ममार्गान्निरस्ता
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

पादावेतौ परमचतुरौ भोग्यधामाभिगन्तुं
हस्तावर्थाविचयकृते नैपुणीं प्राप्नुतां मे।
केषां भोगो धनमपि च कस्यान्वहं शोशुचीमि
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

कृत्वा यत्नं प्रतिदिनमिमे पोषिता आत्मजा ये
येषां हेतोर्लुठितमजिरे दुर्मदान्धेश्वराणाम्।
उड्डीनास्ते खग इव परित्यज्य नीडं मदीयं
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

लब्ध्वा कीर्तिं क्वचिदतितरां दृप्तचेता अभूवम्
रब्ध्वा पापं क्रकचसदृशैः पीडिताहं निकारैः।

काले लीने निभृतनिभृतं कीर्त्यकीर्ती उभे ते
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

देहे जीर्णे शिरसि पलिते विक्लवेष्विन्द्रियेषु
रूपच्छाया वलिषु पिहिता बान्धवा जानते नो।
किंस्वित् काले न लयमुपयातीत्यहं ज्ञातुमीहे
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

देशे काले यदपि न परिच्छिद्यते तद् विमृग्यम्
तत्त्वं प्रोतं निखिलभुवने सर्वधीसाक्षिभूतं।
ज्ञाते तस्मिन् श्रितमथ पदाम्भोजयुग्मं त्वदीयं
किं कुर्वेऽस्मिन् विषमजगति प्रीयते नो मनो मे।।

◆◆◆◆◆

मनोवेदनम्

न्यस्तशस्त्रं जनं वीक्ष्य शूरायते
याचमानं जनं वीक्ष्य दूरायते।
बान्धवर्द्धौ सदा दन्तकूरायते
जायते तावता मे मनोवेदनम्।।

ह्रीदयाकीर्तिभिः सद्गुणैरुज्झितं
श्रीर्वृणोति क्षणे हृच्छयैर्निर्जितम्
भुञ्जते श्वान एते हविष्यं मुदा
जायते तावता मे मनोवेदनम्।।

दूरपाताय हंसाः प्रसिद्धाः सदा
यान्ति गेहच्छदिं वृक्षतो वायसाः।
स्पर्धते वासुदेवेन शल्यो यदा
जायते तावता मे मनोवेदनम्।।

कानने जम्बुकोऽयं शशैर्वेष्टितो
मन्यते सिंहमात्मानमुद्दीपितः।
शारदाभ्रे यदा श्रूयते गर्जनं
जायते तावता मे मनोवेदनम्।।

ख्यापनेनानुतापेन दानेन वा
स्वैः शुभैः कर्मभिर्वा तपश्चर्यया
स्वीयपापोच्चयो नो यदा क्षाल्यते
जायते तावता मे मनोवेदनम्।।

आयुरेतद् गतं शास्त्रसंसाधने
तालु शुष्कं बुधानां वृथाभाषणे।
वीक्ष्णैर्हृद्गतं नो यदा बुध्यते
जायते तावता मे मनोवेदनम्।।

भानुराच्छाद्यते मेघखण्डैर्यदा
वैनतेयस्य मार्गं श्रिता मक्षिका।
मन्युमभ्याविशत्यञ्जसा निर्बलो
जायते तावता मे मनोवेदनम्।।

जाठराग्नौ जुहोत्येष आत्मंभरि-
र्वर्षतीन्द्रस्तदा गोष्पदप्रं क्षितौ।
वीक्ष्य हव्यैर्व्यपोढं गृहे पावकं
जायते तावता मे मनोवेदनम्।।

कोकिलानां स्वनो दर्दुरैश्छिद्यते
प्रीतिबन्धो वृथाबन्धनैर्भिद्यते।
यत् तटेनाप्रमेयोऽम्बुधी रुध्यते
जायते तावता मे मनोवेदनम्।।

कालरूपं पुरस्कृत्य दुर्योधनं
यस्य मृत्युर्वशे सोऽपि भीष्मो हतः।
कालगत्यैष सिंहो मृगैर्हन्यते
जायते तावता मे मनोवेदनम्।।

तादृशं मौनमन्तर्न किं लभ्यते
पक्षिमौनं यथा सूर्यनिम्लोचने।
जर्जरायां तनौ निर्जरेयं तृषा
जायते तावता मे मनोवेदनम्।।

वेणुगुल्मं क्षिपत्यग्निरेर्धैर्वृतः
क्षिप्यते राजहंसो बकैरावृतः।
हन्ति राष्ट्रं नृपश्चाटुकारैर्वृतो
जायते तावता मे मनोवेदनम्।।

यन्नृपाकाङ्क्षयेयं प्रजा हन्यते
यूथपानां यशोधा रणे हन्यते।
सज्जनो वाक्शरैर्यत् खलैर्हन्यते
जायते तावता मे मनोवेदनम्।।

वेगितो दंशको व्योम्नि तार्क्ष्यायते
दभ्रमेधोऽपि गोष्ठीषु विद्वायते।
ईशतन्त्रे जगत्येष ईशायते
जायते तावता मे मनोवेदनम्।।

शापभीतो द्रुतो वासवान्वेषितो
दृश्यते नो हुताशः शमीगर्भगः।
सर्वभक्षत्वमग्नेर्यदा घुष्यते
जायते तावता मे मनोवेदनम्।।

◆◆◆◆◆

अहर्निशम्

नो अरातियोगतो न मित्रविप्रयोगतः
कूटकारिलोकतो मनःप्रमाथिशोकतः।
न त्रितापतो न देहपाततो बिभेम्यहं
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

अत्र दीर्यते धरापि सागरोऽपि गीर्यते
तारकाः पतन्ति हन्त ! निर्जरोऽपि जीर्यते।
काल एष शीर्यते विनाशि यद् भवेऽखिलं
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

व्योमवीथिकासु पश्य वायुना विरम्यते
तत्त्वदर्शिभिस्तु संयमैर्यमो नियम्यते।
केन नावबोध्यते मुहुर्मदीयलाघवम्
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

नास्ति शान्तिशातनी पुरातनी हृदि व्यथा
नैव पुण्यघातनी श्रिता मया नवा कथा।
मोहवागुरा विचारयत्यरे वृणोमि कम्
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

बम्भ्रमीति देहकानने न कामकेसरी
नो दशत्यहङ्कृतिर्भुजङ्गमी भयङ्करी।
नो तृषापिशाचिका करोति ताण्डवं भृशं
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

आयुषो जरद्द्रुमस्तृषाघुणैर्न भुज्यते
वासनाविषस्य वल्लरी फलैर्न युज्यते।
लूनपक्षकामनाविहङ्गमी न याति खं
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

यत्र नो निमेषमात्रकं विराममाप्नवं
दुःखदं मया विचार्य दग्धमद्य तद्गृहम्।
छायया वटस्य रक्षिता शये निरापदम्
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

जीविताम्बुधिर्न वासनातरङ्गचञ्चुरः
स्फारमेति चित्तखे न कोऽपि वारिदस्वरः।
श्वभ्रमिन्द्रियाखुभिर्न मानसे विनिर्मितम्
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

निर्वृतिं लभे यथा दुकूलतूलविष्टरे
पांसुधूसरे रमे तथैव तार्णसंस्तरे।
अद्य नो कदाशया सदाशये कृतं पदं
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

श्रीरगम्यगामिनी विवेकशून्यदुर्भटी
लोकनाट्यपात्रनोदनाय सा महानटी।
दर्शकेष्वितेषु लास्यलीलया लुनातु कं
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

यन्मनश्चिरात् तृषाशरैः करण्डकीकृतं
यस्य पूरणाय नैव नीरदाम्बुधी अलम्।
ज्ञानवज्रलैपनैः कृतं तदप्ययोनिभम्
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

जागती परम्परा विलोक्यतेऽत्र भङ्गुरा
तेन हेतुना मदीयदृङ् न कौतुकोद्धुरा।
भूतलं नभश्च नाशवाडवे समिन्धनम्
किं तथापि मे मनः समाकुलत्यहर्निशम्।।

◆◆◆◆◆

चातकेन किं कृतम्

सङ्गलोलुपेन हन्त ! चातकेन किं कृतम्।
स्वातिवारिपूरितेन वारिदेन सङ्गतम्।।

व्योम केन निर्मितं च केन निर्मिता धरा।
यत्तु साधिकारमेव भूतलं विखण्डितम्।।

येन यापितं शुकेन पिञ्जरेऽखिलं वयः।
केन कारणेन तेन पाशतो बहिर्गतम्।।

किं हता मनस्विताथ बन्धुतापि किं धुता।
यज्जगज्जिहीर्षुभिर्भृशं जगत्खलीकृतम्।।

मानवा वसन्ति सर्वतस्तदैव ते सुखम्।
नो यदीह कोऽपि तर्हि जीवनस्य किं फलम्।।

आपणे प्रसारितं मया स्वकीयरक्तकम्।
तत्तु मोदमानबान्धवा पिबन्ति साम्प्रतम्।।

मूकपक्षिणो वसन्ति कोटरे समाहितम्।
श्येनपातपातकेन नास्ति तन्निरापदम्।।

अद्य मानवा वहन्ति व्यर्थमेव पौरुषम्।
ईदृशं पुरा कदापि दानवैश्च नो कृतम्।।

◆◆◆◆◆

कतिधा न विचिन्त्य मनो व्यथते

करिकुम्भविदारणदारुणदृप्त-
हरिर्विपिने न परं वनुते
अधिगम्य बलाद् वनराजपदं
जनतासु पराक्रममातनुते।
नदनेन विकम्पितरक्ष्यपशून्
विनिहत्य सुशासनमातनुते
वनराजवनोद्भववृत्तमिदं
कतिधा न विचिन्त्य मनो व्यथते।।

प्रखरातपतप्तवपुः पथिकः
स्तबकैः सघनं तरुमाश्रयते
तरुरप्यतिथिं शिशिरेण तलेन
फलैर्मधुरैर्बहु तर्पयते।
पथिकः स्वगृहाभरणाय तरो -
र्विटपान् विनिकृत्य गृहं नयते
पथिकस्य तरोः कटुवृत्तमिदं
कतिधा न विचिन्त्य मनो व्यथते।।

विधिरप्यवगन्तुमलन्न भवेत्
जननी यदपत्यकृते सहते
क्व दिवा क्व निशा स्वसुखं परिहाय
दुरन्तविपत्तिशतं वहते।

तनयो विदधाति निकारमतीव
यदा जननीमनसे महते
करुणाकलितं हतवृत्तमिदं
कतिधा न विचिन्त्य मनो व्यथते।।

त्रिपुरारिनिवासगिरिस्तुहिनेन
यदुन्नतभालतले च्यवते
उदरे धृतरत्नचयं जलधि -
त्रितयञ्च यदङ्घ्रियुगं पवते।
रुचिता नहि सा निजमातृधरा
दिविजैर्लषिताऽप्यभिमानवते
कुटिलं बत तस्य चरित्रमिदं
कतिधा न विचिन्त्य मनो व्यथते।।

विपदासु यदञ्चलशीतलवास -
मुपेत्य विषण्णजनो रमते
नयनोत्सवमञ्चलहीनकुवेश-
-वती कुरुते वद कस्य मते।
क्व कवेत कविर्ललनाकचराशि -
मियन्तु विकृत्तकचा क्रमते
पुरुषः किमयं वनिता किमियं
कतिधा न विचिन्त्य मनो व्यथते।।

मदकामविमोहविकारदवै -
ज्वलितो जगतीह हरिं शपते
कलिकालहलाहलपानजडः
पुनरात्मकृते गरलं वपते।
व्रजगोपवधूहृदयावनिमध्य -
गतद्रुमसंश्रयणे त्रपते
विशरारुशरीरकृते गलितं
कतिधा न विचिन्त्य मनो व्यथते।।

◆◆◆◆◆

विश्वबन्धुता गता

विश्वबन्धुता गता गवेष्यतां सखे।
राष्ट्रभावना जने निवेश्यतां सखे।।

तोयराशिरेव दृश्यते नभस्तले
येन तर्पिता वयं सदैव भूतले।
किं तयोरभेद एव न प्रशस्यते
भेदभाव ईदृशो विशस्यतां सखे।।

सर्ववैभवं वनस्य बीजतस्ततम्
तुङ्गशैलशेखरेषु शाखिभिः स्थितम्।
तेऽपि बीजभावमेव यत्प्रपेदिरे
मूलमेकमेव संप्रधार्यतां सखे।।

देशभेदतो रविः क्वचिन्न भिद्यते
तेन सर्वपङ्कजं सदैव मोद्यते।
भूतले जनेन जाह्नवी विभज्यते
मातृकुक्षिदारणं न कार्यतां सखे।।

व्योम्नि शर्वरीपतिश्च यः प्रकाशते
तेन सर्वकैरवाणि लालितान्यरे।
हन्त ! मानवाय मेदिनी न मन्यते
आर्यभूरियन्त्वया न खण्ड्यतां सखे।।

दूरतोऽपि संगता मही विहायसा
तन्महीस्थिता वयं कथं विसंगता।
जातिसम्प्रदायमप्युपेक्ष्यतां सखे
आत्मवज्जनेषु किं न दृश्यतां सखे।।

येऽपि सन्ति खे क्षितौ जलाशयेषु वा
सन्ति पाञ्चभौतिका नु ते कलेवरा:।
विश्वमित्थमेकमेव दृश्यतां सखे
भ्रान्तधारणाऽधुना विभिद्यताम् सखे।।

यत्र भारतस्य गौरवं प्रपञ्चितं
पार्थमानसं च गीतया प्रबोधितम्।
यत्र विश्ववन्द्यजीवनं प्रदर्शितं
सैव देवभारती समर्च्यताम् सखे।।

◆◆◆◆◆

मन्येऽहम्

मन्येऽहं सिकतात: क्वचिदपि सम्भवति तैलनिर्यास:।
नैव च दुर्जनहृदयात् स्वप्ने सद्भावनालेश:।।

मन्येऽहं नारी सा धातुस्तात्पर्यमप्युदाकुरुते।
यस्यां गृहे वसन्त्यां क्षुत्क्रान्ता: शेरते स्वजना:।।

मन्येऽहं सम्मानो विषमाद् गरलादपीह भीतिकर:।
योऽन्तर्निहितैर्यत्नैरधिगम्येत स्वकैरेव।।

मन्येऽहं पाषाणं श्रुत्वा कवितां प्रभूतरससिक्ताम्।
जृम्भाव्यात्तमुखो य: श्मश्रु परामृशति धैर्येण।।

मन्येऽहं जनता सा धर्मे निरताप्यधर्मसंलग्ना।
मौनित्वं या भजते कुत्सितकार्ये समारब्धे।।

मन्येऽहं न पिकास्ते ये फुल्लामाम्रमञ्जरीं दृष्ट्वा।
मत्ताश्चकिता: स्थगिता न कूजन्ति हर्षसंभारै:।।

मन्येऽहं न सुतास्ते पितरो येषां जरातुरा रुग्णा:।
वृद्धाश्रमे निसृष्टा उत्कायन्ते गृहेण विना।।

मन्येऽहं न हि मनुजं सौनिकभवने बलान्नयन्तं तम्।
रज्ज्वैकया निबद्धान् न्यक्कृतचञ्चूनिमान् विहगान्।।

मन्येऽहं कविता सा शब्दान् संगुफ्य यत्नतो रचिता।
या न श्रोतुर्हृदये सद्य: संमूर्च्छनां कुरुते।।

◆◆◆◆◆

ब्रूहि कोऽस्मिन् युगे कालिदासायते

तिग्मरश्मे: करैस्तापितायां क्षितौ
स्वेदसिक्तं धुतश्वाससन्तानकम्।
नग्नपद्भ्यां चलन्तं विलोक्याध्वगं
छाययाच्छादयन् को नु वृक्षायते।।

कुञ्चितायां तनौ शुष्कलालामुखं
भाषणायोद्यतेऽपि स्खलद्वाचिकम्।
वीक्ष्य शीतैर्मधूकाचितैर्वारिभि -
स्तत्तृषां नोदयन् को नु कूपायते।।

एकरूपे यदा हन्त सत्यानृते
अन्धकारेऽखिलं वस्तुजातं यथा।
धर्मसिंहासने सत्यरक्षाव्रती
न्यायकर्मण्यरे को नु हंसायते।।

क्षीणदुग्धा विवत्सा बुभुक्षाकुला:
साश्रुनेत्रा गवाशैर्विकृष्टा मुहु:।
गा नदन्ती: समुत्प्रेक्ष्य शृङ्गाटके
बन्धनच्छेदनै: को नु गोपायते।।

शस्त्रजालं निकृत्यान्तरिक्षे रिपो -
र्यो गिरीशस्य शृङ्गेऽपि योयुध्यते।
लज्जते शौर्यमप्यञ्जसा यत्क्रमे
तं विहाय क्षितौ को नु सिंहायते।।

इन्द्रियद्वारकं त्वं पिधेहि क्षणं
चित्तवल्गास्वपि स्फालनं नो भवेद्।
सर्ववृत्तिं निरुध्यान्तरे वीक्ष्यतां
कः प्रकाशेन भोश्चण्डसूर्यायते।।

मानुषं प्राप्य देवेप्सितं पुण्यतः
कालकूटे भवे कामना दीयते।
गोपिकारञ्जने कामनाभञ्जने
कृष्णचन्द्रानने कश्चकोरायते।।

यान्तु विद्वज्जनाः काव्यकर्मक्षमा
मज्जयन्त्वम्बुधौ स्वीयकाव्योच्चयम्।
नास्ति गोष्ठीगरिष्ठोऽद्य राजा क्वचित्
काव्यपानैर्नु यो भोजराजायते।।

सर्वभूते यदा स्वाकृतिर्दृश्यते
सर्वदुःखे यदा स्वव्यथा भुज्यते।
व्यापकं सर्वधीसाक्षितत्त्वं तदा
चक्षुषोरग्रतो हन्त कृष्णायते।।

श्येनगृध्रादिभिर्लुच्यमानं भृशं
रोदिति व्याकुलं राज्यसिंहासनम्।
तत् त्यजन् निःस्पृहं सर्वलोकैर्वृतः
सत्त्वशुद्ध्याद्य को रामभद्रायते।।

शब्दगुम्फं विधाय क्वचिद् यत्नतः
काव्यबन्धं कथञ्चिद् वयं कुर्महे।
नैव भासो न माघो न बाणोऽधुना
ब्रूहि कोऽस्मिन् युगे कालिदासायते।।

◆◆◆◆◆

विडम्बनम्

नामरूपतोऽपि या पयोनिधौ विलीयते।
हन्त ! तेन सागरेण साऽपगा विगीयते।।

यस्य सौरभं समस्तदिक्षु सम्प्रसारितम्।
तत्सुमेन गर्वितेन सा लता विहीयते।।

ग्रामकुक्कुरा जनेषु नर्दनं प्रकुर्वते।
मौनमास्थितो मृगाधिपोऽपि तैर्विनीयते।।

सैकते मया सदैव सौधभित्तिराहिता।
सा कियत् स्थिरा विचारणे क्षणो न दीयते।।

येन कामनाऽखिला विविक्तसाक्षिणेऽर्पिता।
केवलं जनेन तेन संसृतिर्विजीयते।।

क्षुद्रपल्वलं पिपासया मयाभियाचितम्।
क्षीरसागरेण पश्य मे स्तुतिर्विधीयते।।

वृक्ष एष तर्जयत्यरे महासमीरणम्।
नैव कालगह्वरेऽधरोत्तरं प्रतीयते।।

क्षीयते जिघृक्षया धृतं जगत्प्रतिक्षणम्।
सत्तया विहीनमेव किं नरेण चीयते।।

नन्द्यते विधुन्तुदेन चन्द्रमा विपद्यते।
चन्द्रिकामृतं प्रसह्य राहुणैव पीयते।।

पैतृकं धनं सुतैः प्रसह्य संविभज्यते।
किन्नु तच्चरित्रमेव तालकैः पिधीयते।।

भावकर्मणोर्यङः फलं परार्थता कुतः।
आत्मनेपदेन यैः सदा पदं निधीयते [१] ।।

यङ्लुकं प्रपद्य धातुभिः परार्थमाप्यते।
आत्मनः पदं तथैव किञ्जनैर्न हीयते [२] ।।

पूर्ववत्सना समो जनोऽपि नैव दृश्यते।
व्यत्ययो न येन कस्यचित् पदे विधीयते [३] ।।

पञ्चसंख्यया यथा मुधैव षट्त्वमाप्यते।
अग्रगण्यता तथाद्य दुर्जने निधीयते [४] ।।

दुःखहानिकृद् भवाटवीषु नास्ति साधनम्।
कृष्णरूपमाधुरीषु किं त्वया न लीयते।।

---

१. यङ्प्रत्यये सर्वे धातवो ङित्वादात्मनेपदत्वं प्राप्नुवन्ति, तथैव भावकर्मणोरपि सर्वे धातव आत्मनेपदिनो भवन्ति। एवमेव लोकेऽपि जनाः आत्मार्थमेव पदं गृह्णन्ति।
२. यङ्लुकि सति, धातवः शेषात् कर्तरि परस्मैपदम् इत्यनेन परस्मैपदत्वं प्रतिपद्यन्ते। तथैव जनाः परार्थाय स्वपदं किमर्थं न जहति।
३. सन्प्रत्यये सति धातुः स्वपद एव तिष्ठति। लोके सन्प्रत्ययवज्जना अपि न लभ्यन्ते, ये परेषां पदे व्यत्ययं न कुर्वन्ति।
४. विनाप्यन्यसंख्यायोगेन पाणिनीयशास्त्रे पञ्चन्संख्यायाः षट्संज्ञा भवति। एवमेव दुर्जनोऽपि विना प्रयत्नेन स्वकीयामग्रगण्यतां लोके विदधाति।

◆◆◆◆◆

गङ्गे

तव प्रभावो बलवानथवा राशिर्मदीयपापानाम्।
गङ्गे सम्प्रति गाढं जिज्ञासा बाधते चित्तम्।।

यावन्तस्तु तरङ्गा वक्षस्यालोडयन्ति ते गङ्गे ।
श्रुत्वा नाम तवेदं वक्षस्यस्मिन् ततोऽप्यधिकाः।।

यद्यल्लब्धं लोके तद् तद् गङ्गे तवैव संस्मरणात्।
नास्ति बलं मे किञ्चिद् दौर्भाग्यात् ते दवीयस्याः ।।

अद्य च दृष्टं नीरं गङ्गे स्पृष्टं निपीतमपि बहुधा।
श्वो भविता तीरेऽस्मिन् पुण्येन च केन संवासः।।

स्वर्गादायाता त्वं सत्यमेव मादृशं जनं पवितुम्।
नासीच्छक्तिर्गङ्गे हन्त ! मम क्षीणपुण्यायाः।।

गङ्गे ते महिमा नो जिह्वाकोट्यापि शक्यते ख्यातुम्।
क्वाहं पुनर्वराकी शक्ता स्याम् ते गुणख्यातौ।।

उत्सङ्गे तव गङ्गे सर्वाश्चिन्ता विमुच्य खेलन्त्याः।
चपलं निर्मिषहासं मुग्धं पुनरागतं बाल्यम्।।

भूमिं न स्पृशतो मे पादौ त्वद्दर्शनोत्सुकौ गङ्गे।
विधिना केन कथय मे कालक्षेपस्तु सोढव्यः।।

मलयजलेपः शीतो घनसारो हिमांशुरपि शीतौ।
मातर्गङ्गे तेभ्योऽधिकशीततरस्तव स्पर्शः।।

तव साक्ष्ये जनतानां सम्पाद्यन्तेऽखिलानि कर्माणि।
अतः संस्कृतिर्गङ्गे त्वमसि शुभा भारतीयानाम्।।

गङ्गे किल्बिषनिचयः सद्यः संक्षीयते तव स्पर्शे।
नीराकारे ब्रह्मण्यतो रतो जीवलोकोऽयम्।।

भवदावानलभीता कथमपि नीतास्मि ते तटे विमले।
तरलतरङ्गे गङ्गे तरलीकुरु वासनाजालम्।।

हर्षोत्फुल्लशरीरा ये नृत्यन्तः पिबन्ति ते नीरम्।
अस्मत्तोऽधिकपुण्याः सन्त्येते शाखिनो धन्याः।।

ये किल कलरवगानं शाखास्वारुह्य कुर्वते मधुरम्।
तिर्यञ्चोऽपि हठात् ते क्षपयन्ते कर्मणां बन्धम्।।

अवतरणं ते दिव्यं चेतस्तन्त्रीषु झङ्कृतिं कुरुते।
गङ्गे तेन मनसि मे रणरणको जायतेऽभिनवः।।

◆◆◆◆◆

नो तथा दृश्यते जनः

तान्येव पञ्चभूतानि तन्मात्राणि च तान्यपि।
गन्धादीन्यपि तान्येव नो तथा दृश्यते जनः।।

तथैव वाति वातोऽयं सूर्यस्तपति तादृशः।
वर्षतीन्द्रो दहत्यग्निर्नो तथा दृश्यते जनः।।

पूर्वाधिकानि शुभ्राणि गृहाणि नगराण्यपि।
सौष्ठवं वर्धते नित्यं नो तथा दृश्यते जनः।।

सैव क्षमा क्षमोपेता सैव शेषफणास्थिता।
हन्त ! किन्त्वक्षमोपेतो नो तथा दृश्यते जनः।।

तस्माद् वायुः समुद्भूतस्तस्य स्पर्शस्तु पूर्ववत्।
तस्मादेव समुद्भूतो नो तथा दृश्यते जनः।।

रसः सर्वहिताद् देवात् तस्मादेवोत्स्थितो जले।
द्रवत्वं पूर्ववच्चापां नो तथा दृश्यते जनः।।

रूपात्मकं तथा तेजस्तस्मादेव समुद्गतम्।
येन संयुज्यते सूर्यो नो तथा दृश्यते जनः।।

तस्मात् संजायते शब्दः सर्वलोकेश्वरात् प्रभोः।
आकाशं युज्यते येन नो तथा दृश्यते जनः।।

सर्वलोकतमोहन्ता धर्मांशुः क्षेममध्वनि।
तथैव कुरुते लोके नो तथा दृश्यते जनः।। ◆◆◆◆◆

रुदन्तः शास्त्रसम्भाराः

पिशाचानां समाक्रन्दो दिगन्ते श्रूयते भीमः।
कदाचाराः समन्तात् सभ्यतां वेगेन कृण्वीरन् ।।

नटा येषामुपास्या राष्ट्ररक्षां ते कथं कुर्युः।
रिपौ क्रूरे समायाते कृपाणं के निशिन्वीरन् ।।

न भाषा नैव भावो नो रसो नो शब्दसंश्लेषः ।
निशम्यैतादृशं काव्यं शिरः के के विधुन्वीरन्।।

चरित्रं नाभिजात्यं नो नयो नो विक्रमः कश्चित्।
जनास्तेषामनुध्यानैर्विशेषं किं विषुण्वीरन्।।

न लज्जा नावगुण्ठो नो कटाक्षा नैव बिब्बोकाः ।
उपायैः कैर्युवानस्तत्र माधुर्यं विवृण्वीरन्।।

कदाशासम्भृते चित्ते कुतो वैराग्यलेशः स्यात्।
सुखं यद् वासनाकार्श्ये कथं तत्ते विचिन्वीरन्।।

न वैराग्यं न च ज्ञानं न चित्ते कामसंरोधः।
कथन्ते वाङ्मधूकैर्ब्रह्मणा जीवं विषिन्वीरन्।।

प्रवृद्धा धर्मदिष्टारो यथा वर्षासु मण्डूकाः।
विना गीर्वाणवाणीं भारतत्वं ये नु मन्वीरन्।।

मनो मत्ताप्सरोदोलाविलासैर्वेपते नित्यम्।
प्रलोभव्यालदष्टास्ते कथं कीर्तिं वितन्वीरन्।।

स्मरारूढाश्चलच्चित्ता युवानः पानमत्ताश्चेत्।
रुदन्तः शास्त्रसम्भाराः कथं रक्षां प्रकुर्वीरन्।।

◆◆◆◆◆

मनोवेदना मे विरामं न याति

इमे पीनमीना जलेनापि हीनाः
कथञ्चिन्न दीना न कस्याप्यधीनाः।
तटस्था जलस्थान् हसन्तीति दृष्ट्वा
मनोवेदना मे विरामं न याति।।

जलेष्वेव केचित् स्थलेष्वेव केचित्
इमे वक्रनक्रा जलेऽपि स्थलेऽपि।
निहन्तुं जनान् यत्चरन्तीति दृष्ट्वा
मनोवेदना मे विरामं न याति।।

इयं विश्वभर्त्री सदन्ना धरित्री
जगत्पोषणायैव धात्रा निसृष्टा
तथापि क्षुधार्ता स्वपन्तीति दृष्ट्वा
मनोवेदना मे विरामं न याति।।

इयं सैन्धवी या नृपैर्भूर्यभीष्टा
सजातीयकास्वस्ति रूपे विशिष्टा।
इमे गर्दभास्तां नयन्तीति दृष्ट्वा
मनोवेदना मे विरामं न याति।।

शृगाली वनादेत्य हर्म्यं प्रविष्टा
कथं नागरा: स्यु: सदाचारजुष्टा:।
इमे शाठ्यमिश्रं वदन्तीति दृष्ट्वा
मनोवेदना मे विरामं न याति।।

त्रिलोकीं निगीर्यापि तुष्यन्ति नो ये
तदीये करे लोकपोषस्य भार:।
अनाथा: प्रजा यद् रुदन्तीति दृष्ट्वा
मनोवेदना मे विरामं न याति।।

यदा दस्यवोऽन्यस्य गेहं लुनन्ति
तदाश्चर्यलेशावकाशोऽपि नास्ति।
इमे स्वीयगेहं लुनन्तीति दृष्ट्वा
मनोवेदना मे विरामं न याति।।

न हावा न भावा विलासा न शीला:
न संदृश्यते स्तोकबिब्बोकलीला।
कटाक्षैर्न नार्यो वदन्तीति दृष्ट्वा
मनोवेदना मे विरामं न याति।।

इमे चातका स्वातिनीरं विहाय
प्रभिन्नाशया अन्यनीरं पिबन्ति।
न वीक्ष्याभ्रमालां रुवन्तीति दृष्ट्वा
मनोवेदना मे विरामं न याति।।

चिराय प्रवासादुपावर्तमाना
वियोगाकुलैर्ज्ञातिभिर्वीक्ष्यमाणा:।
स्वगेहं न पान्था विदन्तीति दृष्ट्वा
मनोवेदना मे विरामं न याति।।

भवस्योरुतापात्कथं नोद्विजन्ते
भवस्यौषधं किं हरिं नाश्रयन्ते।
परोत्सादनं नो त्यजन्तीति दृष्ट्वा
मनोवेदना मे विरामं न याति।।

◆◆◆◆◆

के ?

क्षणं पार्श्वे वसन्तस्तत्क्षणं दूरे सरन्तः के ?
समालिङ्ग्य प्रगाढं कण्ठमुच्छेत्तुं यसन्तः के ?

दुरन्तेयं दुराशा सर्पगत्या वल्गति प्रोच्चैः।
स्वबुद्ध्यात्मानमस्याश्चक्रबन्धान्मोचयन्तः के ?

इमे जीवा वराका बंभ्रमत्यस्मिन् जगच्छ्वभ्रे।
बहिर्गन्तुं परं तस्माद् विचारैर्यत्नवन्तः के ?

न माधुर्यस्य लेशो हन्त संसाराम्बुधावस्मिन्।
इमे निम्बस्य कीटाः स्वेच्छया निम्बं त्यजन्तः के ?

गता केशा गता दन्तास्तपन्त्यङ्गानि कामिन्यः।
इमे स्त्रीणां समूहे नर्मकेलिं दर्शयन्तः के ?

असृङ्मांसास्थिदिग्धे स्वे शरीरे यादृशी निष्ठा।
शरीरेष्वन्यजीवानां तथा निष्ठां वहन्तः के ?

नराणां यौवनोल्लासो विलासो दुष्कृतं सूते।
विवेकेनेन्द्रियग्रामं नियम्यैनं दहन्तः के ?

कदाशासंभृते चित्ते सुखं कुत्र स्थितिं कुर्यात्।
विधूयानन्तनानात्वं महिम्नि स्वे लसन्तः के ?

महारण्ये समाजे रोरवीत्युच्चैर्जनो भीतः।
विलापं तन्निशम्यापि स्वकार्ये व्यापृणन्तः के ?

हता चातुर्यशीला धीर्जना मौर्ख्येण सन्दिग्धाः।
विनाशं सन्ततं दृष्ट्वा जगत्सत्यं मनन्तः के ?

गृहे मेरुं प्रतिष्ठाप्यापि काकिण्याः कृते भ्रष्टाः
प्रलोभव्यालदष्टाः स्वीयराष्ट्रं खण्डयन्तः के ?

प्रकम्पन्ते पिशाचा अप्यरे यद् दुष्कृतं श्रुत्वा।
अहोरात्रं कुकृत्यैर्धर्मशास्त्रं खण्डयन्तः के ?

◆◆◆◆◆

निर्भया भ्रमाम्यहम्

न चञ्चुरीति चेतनासु चण्डचित्तमर्कटो
न दन्दशीति मर्मजालकेषु कामकर्कटः।
न दन्दहीति मां भयेन कालदण्डचर्पटो
जगज्जटालजङ्गलेषु निर्भया भ्रमाम्यहम्।।

मया मनोविकारकोऽपि काम एष तर्जितो
मया मनोविजृम्भको विभाव एष भर्जितः।
मया करालसङ्कटे न धर्म एष वर्जितो
जगज्जटालजङ्गलेषु निर्भया भ्रमाम्यहम्।।

न मोहवागुरासु बध्यते मनो विहङ्गमो
विकल्पजल्पनासु न प्रवर्तते द्रुतङ्गमः।
उदेति हृद्गिरौ न तिग्मकामनापतङ्गमो
जगज्जटालजङ्गलेषु निर्भया भ्रमाम्यहम्।।

वृथैव षट्पदः सुपद्मकोटरे प्रमोदते
मतङ्गजोऽपि हेमशृङ्खलासु नैव शोभते।
मनश्शुके तु रत्नपञ्जराद् द्रुतं विनिर्गति।
जगज्जटालजङ्गलेषु निर्भया भ्रमाम्यहम्।।

विभाति या सृतिः प्रफुल्लकेतकीव दन्तुरा
प्रवातनीतमेघामालिकेव सास्ति भङ्गुरा।
अतोऽखिलं विहाय केशवाङ्घ्रिसङ्गभासुरा
जगज्जटालजङ्गलेषु निर्भया भ्रमाम्यहम्।।

◆◆◆◆◆

कालिका करालिका

रसातलं महातलं तलातलं धरातलं
प्रपूर्य गर्जनैर्नभोविदारकैश्चलाचलम्।
प्रचूर्ण्य पादताडनैर्दिगन्तदन्तिनां बलम्।
समुत्थिता क्षितिं विदार्य कालिका करालिका।।

गृहान्धकूपलुण्ठनेन चेतनामपश्यताम्
असच्छरीरशर्वरीप्रकाशमेव पुष्यताम्।
निमज्ज्य रागकर्दमे चलश्रिया न तुष्यताम्
मनांसि बोधयेद् द्रुतं मनस्तमोविदालिका।।

हरोऽपि हर्तुमक्षमः क्षमो न सर्जने विधिः
हरिर्न पालनाय लभ्यते न शक्तिसन्निधिः।
घनावली न वर्षणाय मज्जनाय वारिधिः
प्रभुर्न दुग्धनीरयोर्विवेचने मरालिका।।

अबोधकन्यकाः प्रधृष्य वर्जनां लुनन्ति ये
निसर्गमप्यनेककुत्सितक्रमैस्तुदन्ति ये।
सुनीतिमार्गमास्थितान् गले निपीडयन्ति ये
निकृत्य तच्छिरांसि खेलतात् कपालमालिका।।

क्वचिद् घृताक्तभोजनाः क्वचिद् बुभुक्षितोदराः
प्रियाश्रिता हसन्ति संरुदन्ति शोककातराः।
क्वचिद् गृहा लिहन्ति खं क्वचिच्च सन्ति कन्दराः
समञ्जसं करोतु जीवकर्मणां निभालिका।।

सहस्रदीर्घबाहुदण्डजालपूरिताम्बरा
पिशाचकैर्नरीनृतीत्यनन्तसक्थिडम्बरा।
सदा निशुम्भशुम्भयोर्वधाय जातसङ्गरा
कटत्कटत्स्वरेण चाकटीतु मुण्डमालिका।।

धनुर्धनञ्जयस्य यत्कृपां विना विकुण्ठितम्
शिवेन यद्भयेन पादयोस्तले विलुण्ठितम्।
मुखानलैः प्रचण्डवीचिसागरेण शुण्ठितम्
कणं कणं च सैव जाग्रहीति नन्दबालिका।।

त्वदीयशक्तिमन्तरेण कुञ्जरः खरायते।
विशुभ्रराजहंस एष तत्क्षणं बकायते।
त्वया विना तु वैनतेय एष मक्षिकायते।
विलोक्य मूषिकानहो पलायते विडालिका।।

कदापि यन्न वाव्यथीति भारतस्य रक्षणे
निशम्य रामनिन्दनं न चाक्वथीति तत्क्षणे।
मनाङ् न मथ्यते च यत् सहोदरस्य तक्षणे
पिबेदसृक् च तद् वहन्तु शोणितप्रणालिका:।।

इतस्ततः सरन्ति मुक्तमूर्धजैर्घना इमे
धरा प्रकम्पते हठादटन्ति पर्वता इमे।
त्वदीयनर्तने प्रवर्तिते प्रफुल्लिता इमे
पिशाचभूतशम्बरा नटन्ति दत्ततालिकाः।।

सुधावदातदेहबिम्बरक्तचञ्चुकानिमान्।
परप्रपीडनेन मोदमानमानसान् बकान्
प्रचूष्य राष्ट्ररक्तमस्थिचर्वणे कृतोद्यमान्
नखैश्चरीकृतीत्वियं जगत्कटाहफालिका।।

समूलकाषमुत्कषेदधर्मशासने स्थितान्।
पिनष्टु शुष्कपेषमाततायिनो नराधमान्।।
चरच्चरेति चर्वतात् प्रसह्य राष्ट्रघातुकान्
विशुभ्रदन्तपङ्क्तिनिःसन्मरीचिजालिका।।

विपाट्य खं यया रविः शशी च कन्दुकीकृतौ
विशोष्य कं ययाऽनिलानिलौ च कुक्षिसात्कृतौ।।
क्षणेन किं विलक्षणं न कोऽपि दृश्यते क्षितौ
प्रचालयत्यरेऽखिलं दिगन्तरप्रचालिका।।

क्वचिद् विहङ्गमैः समं डयेय शारदाम्बरे
क्वचित् तिमिङ्गिलैः शयीय सागरस्य गह्वरे।
क्वचिच्च सिंहशावकै रमेय तुङ्गभूधरे।
भुजौ प्रसार्य सर्वदिक्षु पातु विश्वपालिका।।

◆◆◆◆◆

केन हेतुना ?

जना इमे परस्परं द्विषन्ति केन हेतुना ?
सहोदराः पृथक् पृथक् चलन्ति केन हेतुना ?

प्रचण्डपातकं निरीक्ष्य सम्मुखं स्वचक्षुषा।
सुधीजना विचार्य नो वदन्ति केन हेतुना ?

अनुच्छलत्समे जले ह्रदेऽपि निस्तरङ्गके।
जलौकसस्तु वक्रतां भजन्ति केन हेतुना ?

भिनत्ति सिंहशावकः कठोरपञ्जरं बलैः।
न कामनामलं बुधा मृजन्ति केन हेतुना ?

हसत्यतीतकाल एष वीक्ष्य चित्तचापलम्।
तथापि मोहवागुरां वयन्ति केन हेतुना ?

भवारघट्घट्टिता श्रयन्ति यान् विवित्सया
शठाः कथाच्छलेन तान् विचन्ति केन हेतुना ?

मदीयराष्ट्रमाततायिभिर्भृशं प्रपीड्यते।
तपस्विनस्तपोवने वसन्ति केन हेतुना ?

विलासिनीव नानटीति कामनापिशाचिका।
भुजौ प्रसार्य तद्गले लगन्ति केन हेतुना ?

इमेऽतिशेरते नरा निशाचरानपि क्षुधा।
जले तिमिङ्गिलास्तिमिं गिलन्ति केन हेतुना ?

दुरात्मनां गृहेषु रोपिता विषस्य पादपाः।
विना श्रमं सुधाफलं फलन्ति केन हेतुना ?

स्फुटन्ति यस्य कण्ठमाप्य सर्वशास्त्रफक्किकाः।
अहो तदात्मजा जडा भवन्ति केन हेतुना ?

प्रसह्य यैर्निवेशिता गृहेषु चञ्चला रमा।
न ते मनोदरिद्रतां त्यजन्ति केन हेतुना ?

अलं न यस्य कर्मशोधनाय जाह्नवीजलम्।
नरं च तं वचःशतैः स्तुवन्ति केन हेतुना ?

◆◆◆◆◆

निष्फलं करोति

निष्फलं करोत्यसौ मरुं जलाय चङ्खनीति।
श्रेयसः सृतिं जगत्यरे न कोऽपि बोबुधीति।।

ईशतां प्रकाशयत्यसौ वृथामदस्मितेन।
यत् तृणस्य मुष्टिभिर्हिमालयं निजोगुहीति।।

अन्धको न बुध्यते दिवाकरप्रभाचयेन।
बीजवापमप्यहो फलोन्मुखं न वेविदीति।।

गर्वितो महत्तरव्यतिक्रमं चरीकरीति।
पश्य जम्बुकोऽपि सिंहभागमेष मोमुषीति।।

फेननश्वरे चराचरे स्थिरत्वमद्य कस्य।
धूमिकातमस्तमीतमः क्वचिन्न जङ्घनीति।।

श्रीमदान्धता जनस्य दृष्टिमेव चङ्क्रमीति।
सान्धता दरिद्रताञ्जनं विना न नानशीति।

ज्योतिरिङ्गणार्चिरेव यत्कृते प्रजाज्वलीति।
सूर्यमण्डलं तिरस्क्रियामुपेत्य शंशमीति।।

कामनाप्रपूरणाय कुक्कुरान् प्रशेश्रयीति
वायुना वशीकृतं तृणं तथैव जङ्गमीति।।

तिग्मरश्मिरद्य दीपकं प्रयाचते मुधैव।
क्षुद्रको मनस्विनं जनं प्रसह्य चेक्षिपीति।।

ब्रूहि तस्य सस्यसम्पदा कथं वरीवृधीति।
क्षेत्ररक्षणाय यस्तु मूषिकान् नियोयुजीति।।

उन्दुरोर्बिले बलाद् बिलेशयो निवेविशीति।
दारुणं पदाप्यनाहतः श्वसन्नु दन्दशीति।।

अद्य मानवो न कोऽपि कस्यचिद् विशाश्वसीति।
बालकोऽपि मातुरञ्चलं भयेन शेश्रयीति।।

यस्तुषं विहत्य भागधेयमेव नेनिदीति
जीर्णपात्रके स गोप्रदोहनं न मोमुचीति।।

एष भोगसागरे निमज्जितोऽपि जर्गृधीति।
हन्त ! नास्ति कोऽपि यस्तृषाग्निना न दन्दहीति।।

आत्मदुःखजालकैर्जनस्तथा न चेखिदीति।
अन्यसौख्यवार्तयाञ्जसा यथा नु दोदवीति।।

हन्त ! चातको जलाप्तये बलाहकं गृणाति।
तं निरीक्ष्य विह्वलो जनौघ एष बम्भ्रमीति।।

दृष्टिमानरेऽन्धहस्तयोः खलीनकं समर्प्य।
मङ्क्षु लक्ष्यमापयिष्यतीति एष मम्मनीति।

प्रत्यहं दिवाकरो निजं करं[१] वितन्तनीति।
लोकरक्षणाय याचने जनो न चेखिदीति।।

आत्मभाव एष मानवे यदैव जञ्जनीति।
श्रेयसः सृतिं[२]सृतौ[३] जनस्तदैव बोबुधीति।।

१. करः - किरणः, हस्तश्च। २. सृतिः मार्गः, तम्। ३. सृतिः जगत्, तस्मिन्।

◆◆◆◆◆